॥श्रीकृष्णावेणी स्तोत्रम् ॥

ध्यानम्-

श्रीमत्कृष्णा सवेणी मणिमयमुकुटा पद्मपत्रायताक्षी

कस्तूरीकुङ्कुमाभ्यां विलसितवदना रत्नवत्कुण्डलाढ्या।

काञ्चीकेयूरहाराङ्गदमणिविलसन्नुपुरा पीतवस्त्रा

पायान्मां विष्णुरूपा करधृतवलयाभीतिशङ्खाब्जचक्रा॥

स्तोत्रम्-

स्रवन्ती सह्याद्रेर्विमलजलधारा शुभनदी

दिशन्ती साम्राज्यं स्नपितमनुजानां शिवपदम्।

स्तुता या गीर्वाणैर्जयजयवचोभिर्मुनिवरैः

जयन्ती सा वेण्या सह सकलतीर्था प्रतिदिनम्॥१॥

द्विजो वा चाण्डालो मृगखगजजीवोऽपि च तरुः

मृतो वा जातो वा वसति तव तीरे हि सुभगे।

कदाचित्ते कृष्णे स्पृशति तव नीरं पिबति वा

स मुक्तः संसाराद् भवति यमपाशात् कलियुगे॥२॥

शिवे कृष्णे तृष्णां हरसि नितरां वैष्णवि शुभे

सुपुण्ये पापाहे परमशिवदे मोक्षफलदे।

जये ऋद्धे सिद्धे जननि जनतापत्रयहरे

नमामि त्वां देवि त्रिविधमपि चापं च हर मे॥३॥

सकृत्कृष्णावेण्योः कलिमलहरे सङ्गमजले
नरो ये वै स्नाता ग्रहणसमये सूर्यशशिनोः।
अमन्त्रैर्मन्त्रैर्वा सकलविषमात्पातकभयात्
प्रमुक्ता गच्छन्ति प्रभूसदनवैकुण्ठपदवीम्॥४॥

अहो कृष्णे कृष्णे इति वदति नाम प्रतिदिनं
सकृद्वा यो वारद्वयमपि च वारत्रयमपि।
अतिप्रेम्णा भक्त्या मनसि वचसा वा तव शिवे
कुतो भीतिस्तस्येति च ववदतुस्तौ हरिहरौ॥५॥

जनो वारं वारं पिबति तव नीरं स्पृशति वा
स धन्यो धन्यस्ते स्तवमपि च कृष्णे वदति यः।
यमो भूयो भूयो वदति खलु तस्मै नम इति
स्वयं शम्भुःसाक्षादुरसि कुरुते धारणमपि॥६॥

मम त्वं गङ्गाऽसि त्वमसि यमुना गौतमनदी
त्वमेका गायत्री त्वमसि खलु सारस्वतनदी।
न जानेऽहं त्वन्यं निखिलबहुतीर्थाद्धिकमपि
तदेषःक्षन्तव्यो जननि मम दोषो हि सकलः॥७॥

शिरस्यूर्ध्वं मौलिर्नयनयुगलं भाति विमले
ललाटेकस्तूरी तिलकमपि कृष्णे स्मितमुखे।
चतुर्हस्ते पद्मं वरदमभयं शङ्खवलयं
कटौ सूक्ष्मं पीताम्बरमपि च वन्दे तव पदम्॥८॥

जनो यो वै नित्यं पठति यदि कृष्णाष्टकमिदं

प्रभाते सायाह्ने स्नपनसमये शङ्करकृतम्।

स भूतिं संसारे लभति भुवि कामांश्च विपुलान्

परे मुक्तिः साक्षात् पुनरपि तनुत्वं न लभते॥९॥

इति श्रीमच्छङ्कराचार्यकृतं श्रीकृष्णावेणीस्तोत्रं सम्पूर्णम्॥